उपशास्त्री-I खण्ड साहित्यम्
रघुवंश महाकाव्यम्
द्वितीयः सर्गः

प्र० (1) इति प्रगल्भं पुरुषाधिराजो मृगाधिराजस्य वचो निशम्य।
प्रत्याहतास्त्रो गिरिशप्रभावादात्मन्यवज्ञां शिथिलीचकार॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास विरचितः रघुवंशमहाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति।
अस्मिन् श्लोके सिंहं राजा दिलीपं प्रत्युवाच - राजा दिलीपः सिंहस्य वचो निशम्य ब्रह्मादिरप्यनुलङ्घ्यशासनस्य भगवतो महेश्वरस्य प्रभावादेव मे बाहुस्तम्भो जातः, न पुनरेतस्य पशोः केशरिण इति सिंह वचसा विज्ञाय स्वापमान भावं तत्याज।

व्याख्या: - पुरुषाधिराजः = नराधीश्वरो राजा दिलीपः, मृगाधिराजस्य = मृगेन्द्रस्य केशरिणः, इति = इत्थम्, प्रगल्भं = विस्पष्टम्, वचः = वाक्यम्, निशम्य = श्रुत्वा, गिरिशप्रभावात् = महेश्वर महिम्नः, प्रत्याहतास्त्रः = कुण्ठित शस्त्रः, आत्मनि = विषये, अवज्ञां = गर्हणाम। शिथिलीचकार = तत्याज।

Renu Devi
07/10/20
राधा उमाकान्त सं० महावि० सुखसेना
पूर्णिया।

शास्त्री-II खण्ड साहित्यम्

रघुवंश महाकाव्यम्

त्रयोदशः सर्गः

प्र० (1)- वीरासनैर्ध्यानजुषामृषीणाममी समध्यासितवेदिमध्याः।
निवातनिष्कम्पतया विभान्ति योगाधिरूढा इव शाखिनोऽपि॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य त्रयोदशसर्गात् उद्धृतोऽस्ति।
अस्मिन् श्लोके श्रीरामः सीतां प्रति कथयति-

व्याख्याः- प्रिये! वीरसनैः = आसनविशेषैः। ध्यानजुषाम् = ध्यानवताम्। ऋषीणाम् = मुनीनाम्। समध्यासितवेदिमध्याः = समाधिरूढवेदिमध्यभागाः। अमी = एते। शाखिनोऽपि = विटपिनो वृक्षा अपि। निवातनिष्कम्पतया = पवनशून्यस्थानेऽचञ्चलतया। योगाधिरूढा इव = योगाभ्यासरता इव। विभान्ति = शोभन्ते।

भावार्थः- प्रिये! वीरासनेन ध्यानं कुर्वतां निश्चलाङ्गानां मुनीनाम् आश्रमवेदिमध्यवर्तिनोऽमी वृक्षा अपि वातप्रवराहित्येन निश्चलतया योगाभ्यासिन इव लक्ष्यन्ते। अर्थात् तपस्विनामेतेषां संसर्गाद् एषु तरुष्वपि तपस्विगुणाः समायाताः। वीरासन-लक्षणं तु -"एकपादमथैकस्मिन् विन्यस्योरुणि संस्थितम्।
इतरस्मिंस्तथा चान्यं वीरासनमुदाहृतम्॥"

गरुड़पुराणे तु -
उत्थितस्तु दिवा तिष्ठेद् उपविष्टस्तथा निशि।
एतद् वीरासनं प्रोक्तं महापातकनाशनम्॥"

Ronu Devi
07/10/20
राधा उमाकान्त सं० महावि० सुखसेना पूर्णिया।

शास्त्री-Iखण्ड साहित्यम्

अभिज्ञानशाकुन्तलम्

सप्तमोऽङ्कः

प्र० (1) - एवमाश्रमविरुद्धवृत्तिना संयमः किमिति जन्मतस्त्वया ।
सत्वसंश्रयसुखोऽपि दूष्यते कृष्णसर्पशिशुनेव चन्दनम् ॥

उत्तरम्:- प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञानशाकुन्तलम् नाट्य शास्त्रस्य सप्तमोऽङ्कात् उद्धृतोऽस्ति ।

अस्मिन श्लोके तपस्विन्या बालकरात् केसरिकिशोरकं मोचयितुं अभ्यर्थितो राजा दुष्यन्तः शिशोः समीपं गत्वा सस्मितं ब्रूते - एवं = अनेन प्रकारेण सिंहं शिशुपीडनादिना आश्रमविरुद्धवृत्तिना = आश्रमस्य = तपोवनस्य विरुद्धा = प्रतिकूला वृत्तिः = व्यापारो यस्य स तादृशेन आश्रम विपरीताचारेण त्वया = बालेन जन्मतः = जन्मन आरभ्य सत्त्वसंश्रयसुखोऽपि सुखयतीति सुखः, सत्त्वानां संश्रयेण सुखः सत्त्वसंश्रयसुखः यद्वा सत्त्वस्य संश्रयः सत्त्वसंश्रयश्चासौ सुखश्चेति सत्त्वसंश्रयसुखः = सकलजीवा भयदानस्पृहणीयः संयमः = अहिंसादिनियमः आत्मदमनम्, कृष्णसर्पशिशुना - कृष्णसर्पस्य शिशुना = शावकेन उद्दीप्तगरलजातीयकृष्णसर्प - बालकेन चन्दनमिव तदाख्यो गन्धवृक्षमिव किमिति = कुतो नु कथं, दूष्यते = कलुषी क्रियते ।

अत्रोपमानुप्रासावलङ्कारौ स्वागता वृत्तञ्च ।

Renu Devi
07/10/20

राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।

उपशास्त्री - द्वितीय खण्ड साहित्यम्

रघुवंश महाकाव्यम्
द्वितीयसर्गः

प्र०(1) भवानपीदं परवानवैति महान् हि यत्नस्तव देवदारौ ।
स्थातुं नियोक्तुर्न हि शक्यमग्रे विनाश्य रक्ष्यं स्वयमक्षतेन ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीयसर्गात् उद्धृतोऽस्ति। अस्मिन् श्लोके राजा दिलीपः सिंहं प्रति कथयति - ननु सिंह! अहमिव भवानपि पराधीनः, अहं गोरक्षणे नियुक्तश्चेत् त्वमपि देवदारुसंरक्षणे नियुक्तः इति देवदारु यत्नेन रक्षसीति समुचितमेतत्। स्वामिनः समक्षं तदीयं वस्तु विनाश्य स्वमक्षशरीरः सेवकः लज्जासङ्कोचाभ्यामभिभूतः सन् स्थातुं नैव पारयेत्। अतोऽहमिमां धेनुं विनाश्य कथं तत्पुरतो व्रजामि?

व्याख्या :- परवान् = पराधीनः, भवानपि = श्रीमानपि, इदम् = कर्तव्य गुरुत्वम्, अवैति = जानाति, हि = अतः, तव = भवत, देवदारौ = देवदारुतरुरक्षणे, महान् = भूयान्, यत्नः = पर्यवेक्षणप्रयासो विभाव्यते, रक्ष्यं = रक्षणीयं पालनीयं वा वस्तु, विनाश्य = नाशयित्वा, स्वयम् = आत्मना, अक्षतेन = अव्रणेन कुशलेन वा, नियोक्तुः = नियोजकस्य स्वामिनः, अग्रे = पुरतः, स्थातुं = सन्निधातुम्, शक्यं = साध्यम्, नहि = नैव

Renu Devi
07/10/20

राधा उमाकान्त सं० महावि० सुरवसेना,
पूर्णिया ।